॥ चतुर्थोऽध्यायः ॥

विष्णुर्ब्रह्म तथा दातॆत्यॆवं नित्यमुपासनम ।
कार्यमापद्यपि ब्रह्म तॆन यात्यपरॊक्षताम ॥ १ ॥

प्रारब्धकर्मणॊऽन्यस्य ज्ञानादॆव परिक्षयः ।
अनिष्टस्यॊभयस्यापि सर्वस्यान्यस्य भॊगतः ॥ २ ॥

उत्तरॆषूत्तरॆष्वॆवं यावद्वायुं विमुक्तिगाः ।
प्रविश्य भुंजतॆ भॊगांस्तदंतर्बहिरॆव वा ॥ ३ ॥

वायुर्विष्णुं प्रविश्यैव भॊगश्चैवॊत्तरॊत्तरम ।
उत्क्रम्य मानुषा मुक्तिं यांति दॆहक्षयात सुराः ॥ ४ ॥

अर्चिरादिपथा वायुं प्राप्य तॆन जनार्दनम ।
यांत्युत्तमा नरॊच्चाद्या ब्रह्मलॊकात सहामुना ॥ ५ ॥

यथासंकल्पभॊगाश्च चिदानंदशरीरिणः ।
जगत्सृष्ट्यादिविषयॆ महासामर्थ्यमप्यृतॆ ॥ ६ ॥

यथॆष्टशक्तिमंतश्च विना स्वाभाविकॊत्तमान ।

www.yoursigma.com

अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिताः ।
दुःखादिरहिता नित्यं मॊदंतॆऽविरतं सुखम ॥ ७ ॥

पूर्णप्रज्ञॆन मुनिना सर्वशास्त्रार्थसंग्रहः ।
कृतॊऽयं प्रीयतां तॆन परमात्मा रमापतिः ॥ ८ ॥

नमॊ नमॊऽशॆषदॊषदूरपूर्णगुणात्मनॆ ।
विरिंचिशर्वपूर्वॆड्यवंद्याय श्रीवराय तॆ ॥ ९ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचित ब्रह्मसूत्राणुभाष्यॆ चतुर्थॊऽध्यायः ॥

॥ इति श्रीमदणुभाष्यम ॥

www.yousigma.com